**परोपकारः**

१. परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः ।
परोपकाराय दुहन्ति गावः परोपकारार्थमिदं शरीरम् ।।

२. श्रोत्रं श्रुतेनैव न कुण्डलेन दानेन पाणिर्न तु कङ्कणेन ।
विभाति कायः करुणापराणां परोपकारैर्न तु चन्दनेन ।।

४. स्वयं न खादन्ति फलानि वृक्षाः
पिबन्ति नाम्बः स्वयमेव नद्यः ।
धाराधरो वर्षति नात्महेतोः
परोपकाराय सतां विभूतयः ।।

५. पशवो पि हि जीवन्ति केवलं स्वोदरम्भराः ।
तस्यैव जीवितं श्लाघ्यं यः परार्थे स जीवति ।।

६. परोपकारव्यापारः पुरुषो यः प्रजायते ।
सम्पदं स समाप्नोति परन्ना पि परं पदम् ।।

७. अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।
परोपकारः पुण्याय पापाय परपीडनम् ।।

८. परोपकारः कर्तव्यः प्राणैरपि धनैरपि ।
परोपकारणं पुण्यं न स्यात् क्रतुशतैरपि ।।

९. पिबन्ति नद्यः स्वयमेव नाम्बः
स्वयं न खादन्ति फलानि वृक्षाः ।
धाराधरो वर्षति नात्महेतोः

परोपकाराय सतां विभूतयः ।।

१०. श्रोत्रं श्रुतेनैव न कुण्डलेन
दानेन पाणिर्न तु चन्दनेन ।
विभाति कायः करुणापराणां
परोपकारेण न चन्दनेन ।।